विलक्षणो देवदत्तात् । आराच्छब्दो [1]दूरान्तिकार्थे वर्तते । तत्र 'दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्' (२. ३. ३४/६११) इति प्राप्ते पञ्चमी विधीयते । आराद् देवदत्तात् । [2]आराद् यज्ञदत्तात् । इतर इति [3]निर्दिश्यमानप्रतियोगी पदार्थ उच्यते । इतरो देवदत्तात्[4] । ऋते [5]इति अव्ययं [6]वर्जनार्थे । ऋते देवदत्तात् । [7]ऋते यज्ञदत्तात् । दिक्शब्दः -- पूर्वो [8]ग्रामात् पर्वतः । उत्तरो ग्रामात् । [9]पूर्वो ग्रीष्माद् वसन्तः । [10]उत्तरो ग्रीष्मो वसन्तात् । द्विक्शब्द इत्यत्र शब्दग्रहणं [11]देशकालवृत्तिनाऽपि [12]दिक्शब्देन योगे यथा स्यात्, इतरथा हि दिग्वृत्तिनैव स्यात्, [13]इयमस्याः पूर्वा इति । [14]इह तु न स्यात्, अयमस्मात् [15]पूर्वः कालः इति । अञ्चूत्तरपद -- प्राग् ग्रामात् । प्रत्यग् ग्रामात् (म. भा. १.४५६) । ननु चायमपि दिक्शब्द एव । 'षष्ठ्यतसर्थप्रत्ययेन' (२.३.३०/६०९) इति वक्ष्यति, तस्यायं [16]पुरस्तादपकर्षः । आच् -- दक्षिणा ग्रामात् । उत्तरा ग्रामात् । आहि – दक्षिणाहि ग्रामात्[17] । उत्तराहि ग्रामात् ॥

## षष्ठ्यतसर्थप्रत्ययेन । (३०/६०९)

'दक्षिणोत्तराभ्यामतसुच्' (५. ३. २८/१९७८) इति वक्ष्यति, [18]तस्येदं ग्रहणम् । अतसर्थेन [19]प्रत्ययेन युक्ते षष्ठी विभक्तिर्भवति । दक्षिणतो ग्रामस्य । उत्तरतो ग्रामस्य । [20]पुरस्ताद् ग्रामस्य । उपरि ग्रामस्य । उपरिष्टाद् ग्रामस्य (म. भा. १.४५६) ॥

## एनपा द्वितीया । (३१/६१०)

'एनबन्यतरस्यामदूरेऽपञ्चम्याः' (५. ३. ३५/१९८४) इति वक्ष्यति । तेन [21]युक्ते द्वितीया विभक्तिर्भवति । पूर्वेण षष्ठ्यां प्राप्तायामिदं वचनम् । दक्षिणेन ग्रामम् । उत्तरेण [22]ग्रामम् । षष्ठ्यपीष्यते । दक्षिणेन ग्रामस्य । उत्तरेण ग्रामस्य । तदर्थं योगविभागः कर्तव्यः ॥

## पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् । (३२/६०३)

[23]पञ्चमीग्रहणमनुवर्तते । पृथक् विना नाना इत्येतैर्योगे तृतीया विभक्तिर्भवति, अन्यतरस्यां [24]पञ्चमी च । पृथग् देवदत्तेन, पृथग् देवदत्तात् । विना देवदत्तेन, विना देवदत्तात् । नाना देवदत्तेन, नाना देवदत्तात् । पृथग्विनानानाभिः [25]इति योगविभागो[26] द्वितीयार्थः ।

विना वातं विना वर्षं विद्युत्प्रपतनं विना ।
विना हस्तिकृतान् दोषान् केनेमौ पातितौ द्रुमौ ॥

---

1. दूरान्तिकयोः ब. क. ड. इ. ह. 2. उदाहरणमिदं नास्ति ड. ह. 3. प्रतिनिर्दिश्य⁰ इ, निर्दिश्यमानस्य फ, निर्दिश्यमाने क. 4. इतरो यज्ञदत्तात् इत्यधिकम् क. 5. शब्दः ग, इत्ययं शब्दः वर्जनार्थे वर्तते ड. 6. वर्ज–नार्थम् क. इ. फ. 7. उदाहरणमिदं नास्ति ड, ऋते विष्णुमित्रात् क. 8. यानात् इ. 9. वाक्यमिदं नास्ति ड. 10. उदाहरणमिदं नास्ति फ. 11. देशकालवृत्तीनामपि योगे फ. 12. दिक्शब्देन नास्ति क. इ. 13. दिगियं ग्रामात् पूर्वा क. ह. 14. इह च न स्यात् कालविवक्षायाम् ड, नास्ति फ. 15. पूर्वकालः ड. 16. पुरस्तात् नास्ति फ. 17. वसन्ति चाडाण्लाः इत्यधिकम् क. 18. तस्येदं ग्रहणम् नास्ति इ, इदं नास्ति फ. 19. प्रत्ययान्तेन फ. 20. पुरो ग्रामस्य ड. इ. फ, पूर्वो ग्रामस्य क, पुरतो ग्रामस्य ह. 21. योगे इ. 22. हिमवन्तं क. 23. पञ्चमी इति वर्तते ह. 24. पञ्चमी नास्ति फ. 25. इति नास्ति फ. 26. कर्तव्यः इत्यधिकम् इ. ह.